# ॥ वाल्मीकि रामायण॥

## ३ अरण्यकाण्ड

### अध्याय ३७

एवमस्मि तदा मुक्तः कथं चित्तेन संयुगे ।
इदानीमपि यद्वृत्तं तच्छृणुष्व यदुत्तरम् ॥१॥

राक्षसाभ्यामहं द्वाभ्यामनिर्विण्णस्तथा कृतः ।
सहितो मृगरूपाभ्यां प्रविष्टो दण्डकावनम् ॥२॥

दीप्तजिह्वो महाकायस्तीक्ष्णशृण्गो महाबलः ।
व्यचरन्दण्डकारण्यं मांसभक्षो महामृगः ॥३॥

अग्निहोत्रेषु तीर्थेषु चैत्यवृक्षेषु रावण ।
अत्यन्तघोरो व्यचरंस्तापसांस्तान्प्रधर्षयन् ॥४॥

निहत्य दण्डकारण्ये तापसान्धर्मचारिणः ।
रुधिराणि पिबंस्तेषां तथा मांसानि भक्षयन् ॥५॥

ऋषिमांसाशनः क्रूरस्त्रासयन्वनगोचरान् ।
तदा रुधिरमत्तोऽहं व्यचरं दण्डकावनम् ॥६॥

तदाहं दण्डकारण्ये विचरन्धर्मदूषकः ।
आसादयं तदा रामं तापसं धर्ममाश्रितम् ॥७॥

वैदेहीं च महाभागां लक्ष्मणं च महारथम् ।
तापसं नियताहारं सर्वभूतहिते रतम् ॥८॥

सोऽहं वनगतं रामं परिभूय महाबलम् ।
तापसोऽयमिति ज्ञात्वा पूर्ववैरमनुस्मरन् ॥९॥

अभ्यधावं सुसङ्क्रुद्धस्तीक्ष्णशृङ्गो मृगाकृतिः ।
जिघांसुरकृतप्रज्ञस्तं प्रहारमनुस्मरन् ॥१०॥

तेन मुक्तास्त्रयो बाणाः शिताः शत्रुनिबर्हणाः ।
विकृष्य बलवच्चापं सुपर्णानिलतुल्यगाः ॥११॥

ते बाणा वज्रसङ्काशाः सुघोरा रक्तभोजनाः ।
आजग्मुः सहिताः सर्वे त्रयः संनतपर्वणः ॥१२॥

पराक्रमज्ञो रामस्य शठो दृष्टभयः पुरा ।
समुत्क्रान्तस्ततो मुक्तस्तावुभौ राक्षसौ हतौ ॥१३॥

शरेण मुक्तो रामस्य कथं चित्प्राप्य जीवितम् ।
इह प्रव्राजितो युक्तस्तापसोऽहं समाहितः ॥१४॥

वृक्षे वृक्षे हि पश्यामि चीरकृष्णाजिनाम्बरम् ।
गृहीतधनुषं रामं पाशहस्तमिवान्तकम् ॥१५॥

अपि रामसहस्राणि भीतः पश्यामि रावण ।
रामभूतमिदं सर्वमरण्यं प्रतिभाति मे ॥१६॥

राममेव हि पश्यामि रहिते राक्षसेश्वर ।
दृष्ट्वा स्वप्नगतं राममुद्भ्रमामि विचेतनः ॥१७॥

रकारादीनि नामानि रामत्रस्तस्य रावण ।
रत्नानि च रथाश्चैव त्रासं सञ्जनयन्ति मे ॥१८॥

अहं तस्य प्रभावज्ञो न युद्धं तेन ते क्षमम् ।
रणे रामेण युध्यस्व क्षमां वा कुरु राक्षस ।
न ते रामकथा कार्या यदि मां द्रष्टुमिच्छसि ॥१९॥

इदं वचो बन्धुहितार्थिना मया
यथोच्यमानं यदि नाभिपत्स्यसे ।
सबान्धवस्त्यक्ष्यसि जीवितं रणे
हतोऽद्य रामेण शरैरजिह्मगैः ॥२०॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com